**Journal of Interdisciplinary and Multidisciplinary Research (JIMR)**
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 9 Issue 8 August 2014
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

# मुनित्रयस्य तद्धितानुशासनशैली

**डॉ. अशोक कुमार झा**
व्याख्याता–व्याकरण
राजकीय धूलेश्वर आचार्य संस्कृत महाविद्यालय
मनोहरपुर (जयपुर)

व्याकरणमेका विद्येति श्रूयते अपराविद्यागणनायां व्याकरणाभिधानं स्मरति मुण्डकोपनिषद्।[1] भगवान् पतञ्जलिरपि 'व्याकरण नामेयमुत्तरा विद्येति'[2] स्वमहाभाष्य आह। भर्तृहरिस्तु 'पवित्रं सर्वविद्यानामधिविद्यं प्रकाशत'[3] इत्युक्त्वा ततोऽपि लोकोत्तरं महिमानं बभाण। स्वोपज्ञवृत्तौ त्वितोऽप्यधिकं व्याहरन् सर्वविद्याभ्यो व्याकरणस्य पवित्रस्य पवित्रत्वमुक्तवान् हरिवृषभः।

**आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमं च मन्त्राः।**
**तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः।।**[4]

सर्वविद्यापरायणभूतस्य [5] व्याकरणस्य शब्दसाधुत्वव्यवस्थापकत्वं सर्वप्रत्यक्षम्। भाषां स्थिरयितुं व्यवस्थापयितुं वा प्रातिशाख्यादिषु प्राचीनग्रन्थेषु निर्दिष्टेषु सम्प्रति स्वसत्तामासादयत्सु चानेकेषु शब्दानुशासनेषु पाणिनीयानुशासनं सर्वातिशायि। अस्य रचनापरिपाटी न केनापि मनागप्यद्यावधि अतिशयिता। व्याकरणस्य मुख्यः सम्बन्धः पदैरेव न तु वाक्यैर्नवा वर्णैः, अतो व्याकरणं पदशास्त्रमुच्यते पदवाक्यप्रमाणज्ञ इत्यत्र पदपदेन व्याकरणं बोध्यते।

पाणिनीयया दृष्ट्या विमर्शे सति विज्ञायते यदष्टाध्याय्या भागत्रयम्, तत्र प्रथमद्वितीयाध्या–यात्मके प्रथमभागे वाक्यैः पदसङ्कलनं, तृतीयचतुर्थपञ्चमाध्यायात्मके द्वितीयभागे पदानां प्रकृतिप्रत्ययात्मकं विश्लेषणं तृतीये च भागे षष्ठसप्तमाध्यायात्मके आगमादेशादिविधानानन्तरं विश्लिष्टप्रकृतिप्रत्ययगोगात्पदनिर्माणम् त्रिपादी ऐच्छिकी। शब्दशास्त्रानुसारेण अष्टधा व्याकरणमित्यस्य शब्दविद्याया अष्टप्रमेयकत्वं विज्ञायते।

[1] मूण्डकोपनिषद् – 1–1–4,5
[2] महाभाष्यम् – 1–2–32
[3] वाक्यपदीयम् – 1–14
[4] तत्रैव स्वोपज्ञवृत्तौ – 1–14
[5] वाक्यपदीयम् – 1–15

**Journal of Interdisciplinary and Multidisciplinary Research (JIMR)**
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 9 Issue 8 August 2014
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

नाट्यशास्त्रेऽष्टविद्यपदानां गणनापि लभ्यते।[6] तत्र तद्धितस्यापि पृथगुपादानं विद्यते। सम्प्रति तद्धितप्रत्ययविधानदृष्ट्याऽष्टस्वध्यायेषु सङ्गतिविचारः प्रतन्यते भगवता सूत्रकारेण महत्या सूक्ष्मेक्षिकया तृतीयाध्याये धातुभ्यो सर्वनामानि प्रदर्श्य चतुर्थपञ्चमाध्यायो र्नामतो नाम्नामुत्पत्तिप्रकारः प्रत्यययोगेन प्रदर्श्यते। ङयाप्प्रातिपदिकादिति [7] सूत्रमुल्लिख्य प्रकृतिस्वरूपं विज्ञाप्य सुबन्तात्तद्धितोत्पत्तिरितिसिद्धान्तानुसारेण स्वौजसादिस्वादिप्रत्ययानुशासनात्परं [8] तद्धितप्रत्ययानामनुशासनमेव न्याय्यम्। तद्धितप्रत्ययानुशासनात्प्राक् स्त्रीप्रत्ययानुशासनस्य [9] क्रमः सिद्धान्तमिममं स्मारयति – ''ङ्याबन्तात्तद्धितोत्पत्तिर्याथा [10] स्यान्ङ्याब्भ्यां प्राङ्माभूदिति।'' यदि स्त्रीप्रत्यस्तद्धितप्रत्ययश्च युगपत्प्राप्नुतस्तर्हि स्त्रीप्रत्ययान्तरमेव तद्धितप्रत्ययो भवति इति ज्ञापनार्थमपि स्त्रीप्रत्ययाः पूर्वं प्रकल्पिताः। स्त्रीप्रत्ययानामपि अवान्तरभेदद्वयं विद्यते–साधारणस्त्रीप्रत्ययाः अनुपसर्जनादितिसूत्राधिकारान्तर्गताः[11] स्त्रीप्रत्ययाश्च। समर्थानां प्रथमाद्वा[12] अत्र समर्थानाम् प्रथमात् वेति पदत्रयं विद्यते, पदत्रये स्वरितत्त्वप्रतिज्ञाबलात् प्राग्दिशो विभक्तिः इति सूत्रं यावत्पदत्रयमपि अनुवर्तते तदुत्तरं केवलं 'वा' इत्यस्यानुवृत्तिर्भवति।

ननु समर्थः पदविधिरित्यतः समर्थपदानुवृत्त्यैव सिद्धे सूत्रे समर्थानामिति व्यर्थमिति चेन्न, पदविधित्वाभावात्। न च 'घकालतनेषु' इत्यादौ अलुग्विधानसामर्थ्यात् सुबन्तात्तद्धितोत्पत्तेः सिद्धान्तितत्वात् तस्य पदविधित्वस्य सुलभत्वादिति वाच्यम्, परिनिष्ठि–तत्वरूपसामर्थ्यग्रहणाय समर्थपदस्यावश्यकत्वात्। परिनिष्ठितत्वंच कृतसन्धिकार्यत्वमिति। तेन सुशोभन उपस्थित इति विग्रहे प्रादिसमासे प्रातिपदिकत्वे सुपो लुकि सवर्णदीर्घे सूत्थितस्यापत्यामिति विग्रहे अत इञ् इति इञि तद्धितान्तत्वात् प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ यस्येति चेत्यकारलोपे विभक्तिकार्ये सौत्थितिरिति सिद्धमति अन्यथा सु उत्थित इत्यवस्थायां सवर्णदीर्घात्परत्वादादिवृद्धावावादेशे सावुत्थितिः इति स्यात्। न चान्तरङ्त्वात्सवर्णदीर्घे इञि सिद्धिमिति वाच्यम्, अकृतव्यूहपरिभाषया सावतुत्थितिः मा भूदिति। ततः समर्थानां प्रथमाद्वेति सूत्रादारम्भो भवति तद्धितप्रकरणस्य। शङ्केयमुदेति यत् कृत्तद्वितप्रत्ययाभ्यां नामानि एव निष्पाद्यन्ते तर्हि द्वयोः पृथगध्यायः कथमिति। तद्धितप्रत्ययस्य कृत्प्रत्ययस्य च प्रकृतेर्भेदादतः पृथगध्यायः कृतः। महाभाष्यकारोऽप्याह – तद्धिते उत्सर्गापवादपरिभाषा भवन्ति

---

[6] भरतनाट्यशास्त्रम् – 15–4
[7] ङ्याप्प्रातिपदिकात् – 4–1–1
[8] स्वोजसमौट् – 4–1–2
[9] स्त्रियाम् – 4–1–3
[10] सिद्धान्तकौमुदी – 4–1–1
[11] अनुपसर्जनात् – 4–1–14
[12] समर्थानां प्रथमद्वा – 4–1–82

**Journal of Interdisciplinary and Multidisciplinary Research (JIMR)**
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 9 Issue 8 August 2014
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

तथा पद्धिते प्रकृतिः भवति, अन्यशब्देन च प्रत्ययार्थोऽभिधीचते। नास्त्येतद्वैशिष्ट्यं कृतम्। कृत्प्रत्ययानन्तरं तद्धितप्रत्ययविधानमेतदर्थमेव विहितम्।

आपञ्चमाध्यायं तद्धितप्रकरणं विद्यते–तद्धितप्रकरणक्रमस्तु इत्थम्–प्रकरणस्यैतस्य मुख्यतो विभागद्वयं विद्यते। स्वार्थिकः अस्वार्थिकप्रत्यश्च। मुख्यत्वात् अस्वार्थिकप्रत्ययाः पूर्वमुपन्यस्ताः। कृत्प्रत्ययानां यथाविधं कालानुसारप्रत्ययविभागो विहितः। तद्धितप्रत्ययानां न तथाविधो विभागः कृतः। यतोहि कालविभागेन सह नाऽस्ति कोऽपि सम्बन्ध उपलब्धः। तद्धितप्रत्ययप्रत्ययार्थसामञ्जस्याभावात् अर्थानुसारिणी प्रत्ययव्यवस्था अपि नैव पूर्णतां याति। एतदर्थम् आचार्यपाणिनिरस्वार्थिकप्रत्ययेषु प्रत्ययावधिमाश्रित्य अर्थोपदेशं कृतवान्। अपरिमिततद्वितार्थजटिलताह्रासाय सूत्रकारप्रणाली तस्य लोकोत्तरप्रतिभानिदर्शनं विद्यते। अर्थोपदेशक्रमे किमपि वैज्ञानिकं रहस्यं न विद्यते। तद्धितप्रत्ययै र्यदर्थभावं भवति। तेऽर्थाः तत्प्रत्ययाधिकारे स्वेच्छया सन्निहिताः सन्ति। तद्वितप्रकरणे प्रत्यया–वधि र्निश्चितोऽस्ति। तत्र अर्थक्रम ऐच्छिको विद्यते। अत्र एतद्ज्ञातव्यं यद्यपि अर्थनिर्देशक्रम ऐच्छिकस्तथा बलाबलचिन्तानिदर्शनमत्र प्राप्यते। तस्येदमित्यपत्येऽपि [13] इति वार्तिकमेवात्र प्रणाणम्। परविप्रतिषेधस्य इव पूर्वविप्रतिषेधोऽपि तद्धितप्रकरणे दृश्यते।[14]

चतुर्थाध्याये अण[15] ठक्[16] यत्[17] प्रत्ययानां महाधिकारः प्रचलित। अधिकव्यापित्वदृष्ट्या क्रमेणोपन्यस्ताः प्रत्ययाः अपत्यार्थप्रकरणानन्तरं द्वितीयपादे रक्ताद्यर्थकचातुरार्थिकादीनि कानिचित्प्रकरणानि सन्ति। एतदवधिज्ञानमपरिहार्यम्, यतोहि केषुचित्स्थलेषु प्रत्ययस्य प्रयोगक्षेत्रं अवान्तरावधिदृष्ट्याऽस्ति। तद्यथा–सर्वत्राग्निकालिभ्यो ढक् इति सूत्रवार्तिक–व्याख्यायां कैयेटेन भणितं सर्वत्रेति–सर्वेषु प्राग्दीव्यतीयेषु इत्यर्थः। अत्र यदि प्राग्दी–व्यतीयावान्तराधिकारो न स्यात् चेत्सम्पूर्णतद्धितप्रकरणेऽस्याधिकारो भवेद् योऽनिष्टं विद्यते। अनेन सिद्ध्यति यत्सूत्रकारो महत्सावधानतया प्रकरणावाधिनिरूपणं कृतम् येन प्रत्ययार्थयोः सांकर्यं न भवेत्।

एतत्प्रकरणेऽन्यप्रत्ययेभ्यः शैषिकप्रत्ययवैशिष्ट्यं विद्यते यथाहि वार्तिककारेणा–भिहितम्–

**शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः।**[18]
**सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते।।**

---

[13] पा.सू. – 4–1–92
[14] पा.सू. – 4–1–85
[15] पा.सू. – 4–1–83
[16] पा.सू. – 4–4–1
[17] पा.सू. – 4–4–75
[18] 3–1–7 इति सूत्रे वार्तिकम्।

एतत्प्रकरणेऽर्थापेक्षयावधेर्ज्ञानमधिकावश्यकं विद्यते। शैषिकप्रकरणस्य द्वितीयाध्याय–तस्तृतीयपादं यावद्व्याप्तोऽस्ति। द्वितीयपादे देशाधिकारस्तृतीये च नाऽस्ति कोप्यधिकारः। पृथक्पादोत्तरं युक्तिसङ्गतं नैव विद्यते। प्रकरणेऽस्मिन् प्रत्ययानुशासनानन्तरं तत्र जातः इत्यधिकारः प्रारभ्यते। पूर्वम् प्रत्ययनिर्देशस्ततोऽर्थनिर्देशः कृतो विराजते।

यदा हि एकस्यैव प्रत्ययस्य अनेकेऽर्थाः भवन्ति तदा प्रत्येकेषु अर्थेषु एकस्यैव प्रत्ययस्य मुहुर्मुहुः कथनेन शाब्दिकं गौरवं स्यात्। अतः सामान्यप्रत्ययानुशासनानन्तरं अर्थनिर्देशसतथा प्रत्येकेष्वर्थेषु विधीयमानविशेषप्रत्ययाः कृताः।

**पञ्चमाध्यायस्य सङ्गतिविचार**

अस्वार्थिकप्रत्ययाः षड्वर्गेषु विभक्ताः–अण्, ढक्, यत्, छ, त, ठक्, ठञ् च। आद्यतस्त्रयाणामेकस्मिन्नध्याये पश्चात्त्रयाणामन्यस्मिन्नध्याये विवेचनं वर्तते। द्वितीयपादो वस्तुतोऽस्वार्थिकप्रत्ययपरिशिष्टो वक्तुं शक्यते। पादेऽस्मिन् पूर्वपादस्य इव प्रत्यया–धिकारो नाऽस्ति–योगाभावात्। तृतीयपादे स्वार्थिकप्रत्ययविधानं विहितम्। अत्र समर्थानां प्रथमाद्वा इत्यधिकारः पारं स्वार्थिकतद्धितप्रत्ययेषु समर्थप्रथमेत्यनयो र्नास्त्यधिकारः केवलं वा पदमनुवत्र्यते।[19] अतएव विकल्पेन स्वार्थिकास्तसिलादयो भवन्ति। स्वार्थिकाः प्रतिपादिकात् तदितरे–तद्धिताः सुबन्तात् भवन्ति स्वार्थिकप्रकरणेऽपि भेदा लक्ष्यन्ते – 5/3/36 इति सूत्रं यावत् विभक्तिसंज्ञकास्तत्पश्चात् केवलं स्वार्थिका विनिर्दिष्टाः, स्वार्थिकप्रत्ययेष्वपि 'अतयन्तस्वार्थिक' केवलस्वार्थिक भेदद्वयम् दृश्यते। अवधिद्वयनिर्णयोऽतीवकठितनः। एतद्द्वयोपन्यासो मिश्रितरूपेण कृत इति प्रतीयते।

अत्यन्तस्वार्थिकविषये नागेश आह अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमेव प्रवृत्तिरिति[20] भावः।

हरिदीक्षितोऽप्याह–कुत्साद्यर्थकस्वार्थिकानां कुत्सिते इति सूत्रस्थभाष्योक्तरीत्या ङ्याबन्ताद् उत्पत्तेः सिद्धत्वात् अत्यन्तस्वार्थिके फलमाह तथाहीत्यादिना।[21] स्वार्थिक–प्रत्ययसमाप्त्यनन्तरं (5/4/68) सूत्रात् समासान्तसंज्ञकप्रत्ययारम्भो भवति। तद्धितप्रत्ययैः सह समासान्तपाठः तत्तद्धितप्रत्ययद्योतनाय। यदि समासान्तप्रत्ययस्तद्धितो न स्यात् तर्हि उपराजमित्यत्र नस्तद्धिते इत्यनेन टिलोपो न भवेत्। किञ्च प्रक्रियानिर्वाहाय समासान्तः प्रतययसंज्ञको भवेत्। एतदर्थम् समासप्रकरणेन सह समासान्तोपदेशो नैव कृतः।

[19] अतएव स्वार्थिकतद्धितान्तानां प्रातिपदिकादेव प्रवृत्तिविज्ञानात्। (बालमनोरमा – 5–4–31)
[20] उद्योते (4.1.18) नागेशः।
[21] शब्दरत्नस्याजन्तपुलिङ्गप्रकरणम्।

**Journal of Interdisciplinary and Multidisciplinary Research (JIMR)**
E-ISSN:1936-6264| Impact Factor: 5.886|
Vol. 9 Issue 8 August 2014
Available online at: https://livejimrjournal.in/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

यतोहि समासान्तः स्वार्थिकतद्धितो[22] विद्यते। अतः स्वार्थिकप्रत्ययैः सह समासान्तः पठितः। अत्र प्रश्नोऽयं सम्भवति यत् स्वार्थिकतद्धितप्रत्ययेभ्यः पूर्वमेव समासान्तः कथन्नैव पठित इत्युत्तरयन् भाष्यकार आह–समासान्ताः अपि स्वार्थिकाः, उभयोः स्वार्थिकयोः परत्वात्समासान्ता भविष्यन्ति।

तद्धितप्रयोगस्य विधानेऽपि वैलक्षण्यमस्ति। अन्ये प्रत्ययाः प्रायः प्रकृतेः परे भवन्ति, प्रत्ययः परश्च इति कथनात्। श्नम् प्रत्यय एव तं नियमम् अतिक्रमति। मिदचोऽन्त्यात्परः इत्यस्यापवादनियमात्। किन्तु तद्धितप्रत्ययः प्रकृतेः परस्तु भवत्येव पूर्वीभूयोऽपि भवति यथा बहुतृणम् इत्यादौ बहुच्प्रत्ययः तस्य कृते सूत्रं स्वयं तथा निर्दिशति। टेः प्रागपि भवति, अव्ययसर्वनाम्नामकच्प्राक्टेरिति कथानात्।

इत्थं मुनित्रयविहिता तद्धितप्रत्ययानामनुशासनस्य प्रकारोऽस्माभिः निरूपितः।

[22] भाष्यम् 4–1–1